# shrItArAprAtaHsmaraNam

# શ્રીતારાપ્રાતઃસ્મરણમ્

## Document Information

Text title : tArAprAtaHsmaraNam

File name : tArAprAtaHsmaraNam.itx

Category : suprabhAta, dashamahAvidyA

Location : doc_devii

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Latest update : August 2, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 18, 2023

*sanskritdocuments.org*

shrItArAprAtaHsmaraNam

# શ્રીતારાપ્રાતઃસ્મરણમ્

પ્રાતઃ સ્મરામિ ભવતારિણિ તારિણીં ત્વાં
મન્દસ્મિતાં ત્રિનયનાં ઘનનીલવર્ણામ્ ।
કર્ત્રીકપાલોત્પલખડ્ગધર્ત્રીં
ધાત્રીં સુરાસુરનૃણામખિલેશ્વરીં ચ ॥ ૧॥

પ્રાતઃ સ્મરામિ ખર્વામપવર્ગદાત્રી-
મક્ષોભ્યશમ્ભુસહિતામહિભૂષણાઢ્યામ્ ।
પ્રત્યર્પિતાઙ્ઘ્રિશિવવક્ષસિ સુપ્રસન્નાં
ભક્તાર્તિભયવારણકર્મદક્ષામ્ ॥ ૨॥

પ્રાતઃ સ્મરામિ ષટ્કોણત્રિકોણગેહાં
વસ્વારધરણીગૃહશોભમાનામ્ ।
શક્રાદિસુરસઙ્ઘસુસેવ્યમાના-
માનન્દકન્દાં પઞ્ચાર્ણવીં તામ્ ॥ ૩॥

પ્રાતર્નમામિ નૃકરોટિવિશાલમાલાં
હાલાવિઘૂર્ણિતતરાં સુત્રિનેત્રજાલામ્ ।
વ્યાઘ્રામ્બરાવૃતકટીતટભાસમાનાં
જાડ્યાપહાં ત્વરિતસિદ્ધિપ્રદાં પરેશીમ્ ॥ ૪॥

પ્રાતર્ભજામિ ભવતાપવિનાશિકામ્બાં
સદ્યઃ સમૃદ્ધિનિધિબુદ્ધિપ્રકાશિકાં ચ ।
જ્વલચ્ચિતામધ્યગતાતિઘોરાં
દંષ્ટ્રાકરાલામપિ ભક્તપાલામ્ ॥ ૫॥

યઃ શ્લોકપઞ્ચકમિદં પઠતિ પ્રભાતે
તારાં સ્મરન્પ્રતિદિનં ભુવિભારહારામ્ ।
વિદ્યાવિભૂતિસુખશાન્તિયશાંસ્યવાપ્ય
સોઽન્તે પ્રયાતિ સાલોક્યપદં જનન્યાઃ ॥ ૬॥

ઇતિ શ્રીતારાપ્રાતઃસ્મરણં સમ્પૂર્ણમ્ ।

Proofread by Jonathan Wiener wiener78 at sbcglobal.net, NA

*shrItArAprAtaHsmaraNam*

pdf was typeset on December 18, 2023

Please send corrections to *sanskrit@cheerful.com*